# Shukrakritam 1 Shiva Stotram

# શુક્રકૃતં ૧ શિવસ્તોત્રમ્

## Document Information

Text title : Shukrakritam 1 Shiva Stotram

File name : shukrakRRitaM1shivastotram.itx

Category : shiva, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 100/58-69||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# શુક્રકૃતં ૧ શિવસ્તોત્રમ્

શુક્રોઽપિ હરપાર્વત્યોઃ સન્નિધૌ વટવૃક્ષકે ।
અધઃશિરાસ્તપશ્ચોગ્રં કરોતિ શઙ્કરાજ્ઞયા ॥ ૫૮॥

પૂર્ણે વર્ષસહસ્રે તુ વિગતે શઙ્કરઃ સ્વયમ્ ।
દિવ્યરૂપેણ નિકટેઽદૃશ્યતાગત્ય વૈ વટે ॥ ૫૯॥

શુક્રસ્તુષ્ટાવ શમ્ભું તં લમ્બમાનો વટેઽપિ ચ ।
“નમોઽસ્તુ શિતિકણ્ઠાય કપર્દિને ચ શમ્ભવે ॥ ૬૦॥

મીઢુષે વસુવીર્યાય રુદ્રાય રોહિતાય તે ।
ગિરીશાયાઽર્કનેત્રાય તક્ષકક્રીડનાય ચ ॥ ૬૧॥

પિનાકિને ચ શ્વેતાય ભીમાયોગ્રાય તે નમઃ ।
મહાદેવાય શર્વાય મૃગવ્યાધાય તે નમઃ ॥ ૬૨॥

સ્થાણવે બહુરૂપાય ત્રિનેત્રાય ચ મૃત્યવે ।
ત્ર્યમ્બકાય નમસ્તેઽસ્તુ શઙ્કરાય શિવાય ચ ॥ ૬૩॥

ધ્યાનિને વ્યાપિને સદ્યોજાતાયેશાય તે નમઃ ।
વામદેવાય ચ કૃત્તિવસ્ત્રાય પ્રભવે નમઃ ॥ ૬૪॥

ભગનેત્રવિહન્ત્રે તે પશૂનાં પતયે નમઃ ।
ભૂતાનાં પતયે પૂષાહન્તઘ્નાય ચ તે નમઃ ॥ ૬૫॥

અર્કરૂપાય ચ ન્યગ્રોધાય કાલાય તે નમઃ ।
સઙ્કર્ષણાય રુદ્રાય વહ્નયે યોગિને નમઃ ॥ ૬૬॥

પૃથિવ્યાદ્યષ્ટરૂપાય લિઙ્ગાયાઽલિઙ્ગિને નમઃ ।
પાર્વતીપતયે તુભ્યં ગોપતયે નમો નમઃ ॥ ૬૭॥

મહેશાય ચ ડમરુવાદિત્રાય ચ તે નમઃ ।
કૈલાસસ્થાય દેવાનાં સ્તુત્યાય તે નમો નમઃ ॥ ૬૮॥

મહાવૈષ્ણવસન્નામ્ને ગણાનાં પતયે નમઃ ।
બ્રહ્મિષ્ઠાય ચ શુક્રસ્ય પિત્રે ભૂયો નમો નમઃ ॥ ૬૯॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૦૦-અધ્યાયાન્તર્ગતં શુક્રકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૦૦/૫૮-૬૯॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 100/58-69..

Proofread by PSA Easwaran

---

*Shukrakritam 1 Shiva Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*